# Shakyasimha Stotram

# शाक्यसिंहस्तोत्रम् ४

## Document Information

Text title : Shakyasimha Stotram

File name : shAkyasiMhastotram4.itx

Category : misc, buddha, stotra

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# शाक्यसिंहस्तोत्रम् ४

प्रणमामि जिनं सुगतं सततं तपनीयहिरण्यशरीरच्छविम् ।
वरचक्रविभूषितपाणितलं ससुरासुरमानुषपापहरम् ॥ १॥

प्रणमामि मुनीन्द्रगुरुं ललितं सतताकुलनिर्जितमारबलम् ।
दशपारमिताप्रतिबोधकरं चतुरार्यविबोधकरं सुकरम् ॥ २॥

प्रणमामि हितङ्करदेवनरं सनरामरपूजितदेववरम् ।
अमरादिकषङ्गतिहैत्यकरं सजराजनिमृत्युभयादिहरम् ॥ ३॥

प्रणमामि सुखाकरबोधिभरं स्वसुखं प्रददौ करुणाशयतः ।
परदुःखमसह्य चकार जनुर्गतदोषनिराकुलशाक्यकुले ॥ ४॥

प्रणमामि च लोकहिताय गृहं विजहौ पितरं रमणीसहितम् ।
हयकण्ठकछन्दकदेववृतो मुदितोऽभ्यगमत् सुवने विजने ॥ ५॥

प्रणमामि तपोवनसुभ्रमितं प्रचकार च यस्तु महर्षिगणान् ।
चतुरार्यकब्रह्मविहारपरान् सुगतस्मरणैकतपोव्रतिकान् ॥ ६॥

प्रणमामि महाद्रुममूलवरे सुतृणासनसंश्रितवज्रधरम् ।
शतकोटिसुमारबलास्त्रहरं शतसङ्ख्यतथागतपुत्रवृतम् ॥ ७॥

प्रणमामि च मल्लिकपञ्चशता वणिजः प्रतिपालनमेव कृताः ।
वणिजार्पितपञ्चसुधानयकं शुभपायसभोजनभक्षकृतम् ॥ ८॥

प्रणमामि सुवर्तितधर्मवरं मृगदाववने चतुरासनके ।
विधिशक्रसुरासुरलोकवृतं सुशरीरमहोज्ज्वलसर्वदिशम् ॥ ९॥

गुरुनिर्मितकं सुगतस्तवकं पठनं कुरुते किल यो मनुजः ।
ग्रहरोगभयं नहि तस्य सदा स तु यास्यति मोक्षपुरे सुपुरे ॥ १०॥

इति आदित्यादिनवग्रहकृतं श्रीशाक्यसिंहस्तोत्रं सम्पूर्णम् ॥

*Shakyasimha Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*